अनुष्ठाननिवृत्त्यात्मकभावाभावरूपः तत्र सदाचारः वेदस्मृत्यादिविहितः तत्र निषिद्धश्च कदाचारः इति भेदात् द्विविधः। सदाचारलक्षणोक्तं काशी०। "सदाचारे हि सर्वोऽर्थो नाचारात् रिष्यते पुनः। तस्मात् विप्रेण सततं भाव्यमाचारशालिना। विद्वेषरागरहिता अनुतिष्ठन्ति यं द्विजाः। विद्वांसस्तं सदाचारं धर्ममूलं विदुर्बुधाः"। प्रसङ्गादाचारपदार्थो निरूप्यते तत्र शा०सू०भा०। "चरणादितिचेन्नोपलक्षणार्थेति कार्ष्णाजिनिः" सू०। "अथापि स्यात् या श्रुतिरनुशयसद्भावप्रतिपादनायोदाहृता "तद्यइह रमणीयचरणा इति" सा खलु चरणाद्योन्यापत्तिं दर्शयति नानुशयात्" अन्यच्चरणमन्योऽनुशयः" चरणं चारित्रम् आचारः शीलमित्यनर्थान्तरम्। अनुशयस्तु भुक्तफलात्कर्म्मणोऽतिरिक्तं कर्म्माभिप्रेतम्। श्रुतिश्च कर्मचरणे भेदेन व्यपदिशति "यथाऽऽचारी तथा भवतीति यान्यनवद्यानि कर्म्माणि तानि सेवितव्यानि नेतराणि यान्यस्माकं सुचरितानि तानि त्वयोपास्यानीति च"। तस्माच्चरणाद्योन्यापत्तिश्रुतेर्नानुशयसिद्धिरितिचेन्नैष दोषः यतोऽनुशयलक्षणार्थैवेषा चरणश्रुतिरिति कार्ष्णाजिनिराचार्यो मन्यते" भा०। "आनर्थक्यमिति चेन्न तदपेक्षत्वात्" शा०सू०। "स्यादेतत्कस्मात् पुनश्चरणशब्देन श्रौतं शीलं विहाय लाक्षणिकोऽनुशयः प्रत्याय्यते। ननु शीलस्यैव तु श्रौतस्य विहितप्रतिषिद्धस्य साध्वसाधुरूपस्य शुभाशुभयोन्यापत्तिः फलं भविष्यति अवश्यञ्च शीलस्यापि किञ्चित् फलमभ्युपगन्तव्यम् अन्यथा ह्यानर्थक्यमेव शीलस्य प्रसज्येतेति चेन्नैष दोषः कुतः तदपेक्षत्वात् इष्टादि हि कर्मजातं चरणापेक्षं न हि सदाचारहीनः कश्चिदधिकृतः स्यात्। "आचारहीनं न पुनन्ति वेदा" इत्यादि स्मृतिभ्यः पुरुषार्थत्वादप्याचारस्य नानर्थक्यम्। इष्टादौ हि कर्म्मजाते फलमारभमाणे तदपेक्षएवाचारस्तत्रैव कञ्चिदतिशयमारप्स्यते कर्म च सर्व्वार्थकारीति श्रुतिस्मृतिप्रसिद्धिः। तस्मात्कर्म्मैव च शीलोपलक्षितमनुशयभूतं योन्यापत्तौ कारणमिति कार्ष्णाजिनेर्मतम्। न हि कर्म्माणि संभवति शीलाद्योन्यापत्तिर्युक्ता न हि पङ्गुरां पलायितुं पारयमाणो जानुभ्यां रंहितुमर्हतीति" भा०। "सुकृतदुष्कृते एवेति वादरिः" शा०सू० "वादरिस्त्वाचार्य्यः सुकृतदुष्कृते एव चरणशब्देन प्रत्याय्येते इति मन्यते चरणमनुष्ठानं कर्मेत्यनर्थान्तरम्। तथा ह्यविशेषेण कर्म्ममात्रे चरतिः प्रयुज्यमानो दृश्यते यो हि इष्टादिलक्षणं पुण्यं कर्म करोति तं लौकिका आचक्षते धर्म्मं चरत्येष महात्मेति। आचारोऽपि धर्म्मविशेषएव। भेदव्यपदेशस्तु कर्म्मचरणयोर्ब्राह्मणपरिव्राजकन्यायेनाप्युपपद्यते। तस्माद्रमणीयचरणाः पुण्यकर्म्माणः कपूयचरणा निन्दितकर्म्माण इति निर्णयः" भा०। अत्र शीलाचारयोः पर्य्यायत्वोक्त्या "वेदोऽखिलो धर्म्ममूलं स्मृतिशीले च तद्विदाम्। आचारश्चैव साधूनामात्मनस्तुष्टिरेव च" मनुवचने शीलस्य पृथगुक्तिः ब्राह्मणपरिव्राजकन्यायेनेति बोध्यम्। अतएवानन्तरं मनुनैव "वेदः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः। एतच्चतुर्विधं प्राहुः साक्षाद्धर्म्मस्य लक्षणम्" शीलस्याचारान्तर्भावाभिप्रायेण चतुष्कस्य धर्म्ममूलत्वमुक्तम्। शीलञ्च "ब्रह्मण्यता देवपितृभक्तता, सौम्यता अपरोपतापिता अनसूयता मृदुता, अपारुष्यं मैत्रता, प्रियवादित्वं कृतज्ञता, शरण्यता, कारुण्यं प्रशान्तिश्चेति त्रयोदशविधं शीलमिति" हारीतोक्तं तच्चाचारभेद एव। मेधातिथिस्तु शील समाधाविति धातोरूपमुक्त्वा "शीलं समाधानम् समाधानञ्च मानसोव्यापारः यच्चेतसोऽन्यविषयेषु विक्षेपपरिहारेण शास्त्रार्थनिरूपणप्रवणता तच्छीलमुच्यते" इत्याह। तदप्याचार एवान्तर्भवति। तत्र सदाचाराणां वेदस्मृतिमूलकत्वेन तयोरेव तन्मूलत्वं स्यान्नाचाराणामित्याशङ्क्य यादृशाचारस्य धर्म्ममूलत्वं तमाह मेधातिथिः। "आचारोव्यवहारोऽनुष्ठानम्। यत्र श्रुतिस्मृतिवाक्यानि न सन्ति शिष्टाश्च धर्म्मबुद्ध्याऽनुतिष्ठन्ति तदपि वैदिकवत् प्रतिपत्तव्यम् यथा विवाहादौ कङ्कणधारणादि माङ्गलिकत्वेन यत् क्रियते। याच विवाहयिष्यमाणायाः कन्यायाः प्रख्यातवृक्षचतुष्पथादिपूजा देशभेदेनेत्यादि" एवं होलकाद्याचरणम्। ग्रन्थादौ देवतास्तुतिनमस्कारादिमङ्गलाचरणञ्च बोध्यम्। स्पष्टमुक्तं प्रयोगपारिजाते स्कन्दपु०। "न यत्र साक्षाद्विधयो न निषेधाः श्रुतौ स्मृतौ। देशाचारकुलाचारैस्तत्र धर्म्मो निरूप्यते" अत्र न निषेधा इत्युक्तेः श्रुतिस्मृत्योर्विरोधे आचारस्य न प्रामाण्यमिति गम्यते। तच्चानुपदं विवेक्तव्यम्। स च देशभेदात् कुलभेदात् पुरुषभेदाच्च नानाविधः प्रातिस्विकरूपेण गणयितुमशक्यः। श्रुतिस्मृत्यविरुद्धः सर्व्वोऽपि सदाचारः धर्म्ममूलमतएवास्यात्याज्यत्वमुक्तम् 'देशानुशिष्टं कुलधर्म्ममग्र्यं स्वजातिधर्म्मं न हि संत्यजेच्च"। एवं पित्राद्याचारोऽपि धर्म्ममूलतया ग्राह्यः "येनास्य पितरोयाता येन याताः पितामहाः।